# उद्यममहर्षिः टाटामहोदयः

उद्यमो नाम राष्ट्रस्य चैतन्यम्। उद्योगस्य उत्कर्षो नाम राष्ट्रस्याप्युत्कर्षः। अखिलविश्वस्य उद्योगपतीनां गणनाप्रसङ्गे टाटामहोदयस्य नाम अग्रे गणनीयं खलु। 'जहांगीर रतनजी दादाभाई' इत्याख्यः जे. आर. डी. इति प्रतिथः सत्यमेव भारतस्य भूषणम्।

चतुरधिक नवशताधिक सहस्त्रतमे (१९०४) खिस्ताब्दे फ्रान्सदेशे पॅरिस नगर्यां जातस्यास्य माता सुज्ञाननामा फ्रान्सदेशीया आसित्। पिता रतनजीनामा तु भारतियः। वयसः विंशतिं वर्षाणि टाटामहोदयः फ्रान्सदेशे एव न्यवसत्। तत्र सः एकं संवत्सरं सेनायां समवेत आसित्। तदनन्तरं पितुराज्ञया सः भारतदेशम् आगच्छत्। अकस्मात्समापतिनेन पितृनिधनवज्राघातेन संभ्रान्तस्य तस्य स्कन्धे तरुण वयसि एव टाटा उद्यमसमुहस्य संचालकपदस्य धुरा पतिता। अद्वितीयेन प्रज्ञाबलेन असाधारणेन धृतिबलेन अविरतेन प्रयत्नेन च तेन आजीवनं उद्यमक्षेत्रस्य उत्कर्ष एव चिन्तितः, सफलतां च नीतः। जन्मना पाश्चात्यस्य अस्य कर्मभूमिः तु भारतवर्षम् एव आसित्। 'उद्योगात् नवराष्ट्र निर्माणम्' इति मनीषितं प्रत्यक्षीकर्तुं स भृशं प्रायतत। आधुनिक तन्त्रज्ञानस्य विज्ञानस्य च साहाय्येन तेन टाटा उद्यमसमुहस्य देशस्य च विकासः कृतः। विज्ञानवृद्धये तेन मुम्बपुर्यां टाटासंशोधन संस्था अपि स्थापिता। एषा संस्था अधुना सर्वस्मिन् जगति सुविख्याता अस्ति।

बाल्यादेव विमान उड्डयनस्य आकर्षणं जहांगीरस्य मनसि आसित्। द्वित्रिनवैक (१९३२) मिते खिस्तगणनवर्षे तेन कराचीनगरतः मुम्बपुरिं विमानं प्रथमम् एव आनितम्। एवं भारतीय विमानसेवायाः प्रारम्भः टाटामहोदयेन स्वयमेव कृतः। 'एअर इण्डिया' नाम तस्य प्रयत्नानामेव फलितम्।

पण्डित नेहरुमहाभागस्य प्रेरणया सः कञ्चित्कालं भारतीय स्वातन्त्र्यसंग्रामे अपि सहभागि अभवत्। किन्तु राजकियक्षेत्रे तस्य मनो नैव अरमत। उद्यमक्षेत्रे एव तेन हिमालयवत् उन्नतं कार्यं कृतम्। 'यः क्रियावान् स पण्डितः' इति वचनस्य मूर्तिमन्निदर्शनम् एव टाटामहोदयः। न केवलं स्वातन्त्र्यं, न वा उद्यमशीलता, किन्तु अन्यानि अपि बहूनि कारणानि देशस्य उत्कर्षाय कल्पन्ते इति बहोः कालात् पूर्वमेव तेन दृष्टमासीत्। अयं राष्ट्रहितैषी उद्यममहर्षिं शासनेन 'भारतरत्नम्' इति सर्वश्रेष्ठ उपाधिसमर्पणेन सम्मानितः।

भारतिय उद्योगक्षेत्रस्यायं भीष्माचार्यः, उद्योजकानां शिरोमणि, भारतियविमानसेवायाः च प्रवर्तकः त्रिनवनवैकमिते (१९९३) कालेन कवलीकृतः। तेन समारब्धम् अपूर्वम् असाधारणं च कार्यं पूर्ततां नेतुं सर्वैः अनुष्ठेयः। अनुष्ठितः चेत सः एव तस्मै समुचितः श्रद्धाञ्जलिः स्यात्।